# Shri Ganeshapujavidhi

# શ્રીગણેશપૂજાવિધિ

## Document Information

Text title : Shri Ganeshapujavidhi

File name : gaNeshapUjAvidhi.itx

Category : ganesha, gaNeshapurANa, pUjA

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 69 | 1.69 15-62||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# શ્રીગણેશપૂજાવિધિ

ધ્યાનમ્ -
એકદન્તં મહાકાયં તપ્તકાઞ્ચનસન્નિભમ્ ।
લમ્બોદરં વિશાલાક્ષં જ્વલત્પાવકલોચનમ્ ॥ ૧૫॥

આખુપૃષ્ઠસમારૂઢં ચામરૈર્વીજિતં ગણૈઃ ।
શેષયજ્ઞોપવીતં ચચિન્તયેત્ તં ગજાનનમ્ ॥ ૧૬॥

આવાહનમ્ -
આગચ્છ દેવદેવેશ ! સઙ્કટાન્માં નિવારય ।
યાવદ્ વ્રતં સમાપ્યેત તાવત્ ત્વં સન્નિધૌ ભવ ॥ ૧૭॥

(પુરુષસૂક્તે
અથવા
ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥)
આસનમ્ -
ગણાધીશ ! નમસ્તેઽસ્તુ સર્વસિદ્ધિપ્રદાયક ।
આસનં ગૃહ્યતાં દેવ સઙ્કટાન્માં નિવારય ॥ ૧૮॥

(અથવા
પુરુષ એવેદગું સર્વં યદ્ભૂતં યચ્છ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનઃ યદન્નેનાતિરોહતિ ॥)
પાદ્યમ્ -
ઉમાપુત્ર ! નમસ્તેઽસ્તુ નમસ્તે મોદકપ્રિય ! ।
પાદ્યં ગૃહાણ દેવેશ સઙ્કટં મે નિવારય ॥ ૧૯॥

(અથવા
એતાવાનસ્ય મહિમા અતો જ્યાયાગંશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥)

અર્ઘ્યમ્ -
લમ્બોદર ! નમસ્તેઽસ્તુ રત્નયુક્તં ફલાન્વિતમ્ ।
અર્ઘ્યં ગૃહાણ દેવેશ ! સઙ્કટં મે નિવારય ॥ ૨૦॥

(અથવા
ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પાદોઽસ્યેહાભવાત્પુનઃ ।
તતો વિશ્વઙ્વ્યક્રામત્ સાશનાનશને અભિ ॥)
આચમનીયમ્ -
ગઙ્ગાદિ સર્વતીર્થેભ્યઃ આહૃતં તોયમુત્તમમ્ ।
ગૃહાણાઽઽચમનીયાર્થં સઙ્કટં મે નિવારય ॥ ૨૧॥

(અથવા
તસ્માદ્વિરાઽજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિ મથો પુરઃ ॥)
પઞ્ચામૃતમ્ -
પયો દધિ ઘૃતં ચૈવ શર્કરામધુસંયુતમ્ ।
પઞ્ચામૃતં ગૃહાણેદં સઙ્કટં મે નિવારય ॥ ૨૨॥

(અથવા
પયઃ પૃથિવ્યાં પય ઓષધીષુ પયો દિવ્યન્તરિક્ષે પયો ધાઃ ।
પયસ્વતીઃ પ્રદિશઃ સન્તુ મહ્યમ્ ॥)
સ્નાનમ્ -
નર્મદા ચન્દ્રભાગા ચ ગઙ્ગાસઙ્ગમજૈર્જલૈઃ ।
સ્નાપિતોઽસિ મયા ભક્ત્યા સઙ્કટં મે નિવારય ॥ ૨૩॥

(અથવા
યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યં ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ ॥)
વસ્ત્રયુગ્મમ્ -
ઇભવક્ત્ર ! નમસ્તુભ્યં ગૃહાણ પરમેશ્વર ! ।
વસ્ત્રયુગ્મં ગણાધ્યક્ષ ! સઙ્કટં મે નિવારય ॥ ૨૪॥

(અથવા
તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્ત સાધ્યા ઋષયશ્ચ યે ॥)

યજ્ઞોપવીતમ્ -
વિનાયક ! નમસ્તુભ્યં નમઃ પરશુધારિણે ! ।
ઉપવીત ગૃહાણેદં સઙ્કટાં મે નિવારય ॥ ૨૫॥

(અથવા
તસ્માદ્યજ્ઞાત્સર્વહુતઃ સમ્ભૃતં પૃષદાજ્યમ્ ।
પશૂગુઁસ્તાગંશ્ચક્રે વાયવ્યાન્ આરણ્યાન્ ગ્રામ્યાશ્ચયે ॥)
ચન્દનમ્ -
ઈશપુત્ર ! નમસ્તુભ્યં નમો મૂષકવાહન ! ।
ચન્દનં ગૃહ્યતાં દેવ સઙ્કટં મે નિવારય ॥ ૨૬॥

(અથવા
તસ્માદ્યજ્ઞાત્સર્વહુતઃ ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાઁગસિ જજ્ઞિરે તસ્માત્ યજુસ્તસ્માદજાયત ॥)
અક્ષતાઃ -
ઘૃતકુઙ્કુમસંયુક્તાસ્તન્દુલાઃ સુમનોહરાઃ ।
અક્ષતાસ્તે નમસ્તુભ્યં સઙ્કટં મે નિવારય ॥ ૨૭॥

(અથવા
અક્ષન્નમીમદન્ત હ્યવ પ્રિયા અધૂષત ।
અસ્તોષત સ્વભાનવો વિપ્રા નવિષ્ઠયા મતી યોજાન્વિન્દ્ર તે હરી ॥)
પુષ્પમ્ -
ચમ્પકં મલ્લિકા દૂર્વાઃ પુષ્પજાતિરનેકશઃ ।
ગૃહાણ ત્વં ગણાધ્યક્ષ ! સઙ્કટં મે નિવારય ॥ ૨૮॥

(અથવા
તસ્માદશ્વા અજાયન્ત યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્ તસ્માજ્જાતા અજાવયઃ ॥)
ધૂપમ્ -
લમ્બોદર ! મહાકાય ! ધૂમ્રકેતો ! સુવાસિતમ્ ।
ધૂપં ગૃહાણ દેવેશ ! સઙ્કટં મે નિવારય ॥ ૨૯॥

(અથવા
યત્પુરુષં વ્યદધુઃ કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ કાવૂરુ પાદાવુચ્યેતે ॥)

દીપમ્ -
વિઘ્નાન્ધકારસંહારકારક ! ત્રિદશાધિપ ! ।
દીપં ગૃહાણ દેવેશ ! સઙ્કટં મે નિવારય ॥ ૩૦॥

(અથવા
બ્રાહ્મણોસ્ય મુખમાસીત્ બાહૂ રાજન્યઃ કૃતઃ ।
ઊરુ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥)
નૈવેદ્યમ્ -
મોદકાપૂપલડ્ડૂકપાયસં શર્કરાન્વિતમ્ ।
પક્વાન્નં સઘૃતં દેવ ! નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥ ૩૧॥

(અથવા
ચંદ્રમા મનસો જાતઃ ચક્ષોઃ સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ પ્રાણાદ્વાયુરજાયત ॥)
ફલમ્ -
નારિકેલ ફલં દ્રાક્ષાં રસાલં દાડિમં શુભમ્ ।
ફલં ગૃહાણ દેવેશ ! સઙ્કટં મે નિવારય ॥ ૩૨॥

(અથવા
નાભ્યા આસીદન્તરિક્ષં શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ તથા લોકાંગ અકલ્પયન્ ॥)
તામ્બૂલમ્ -
ક્રમુકૈલા લવઙ્ગાદિ નાગવલ્લીદલાનિ ચ ।
તામ્બૂલં ગૃહ્યતાં દેવ ! સઙ્કટં મે વિનાશય ॥ ૩૩॥

(અથવા
પૂગિફલં સતામ્બૂલં નાગવલ્લિ દલૈર્યુતમ્ ।
તામ્બૂલં ગૃહ્યતાં દેવ યેલ લવઙ્ગ સંયુક્તમ્ ॥)
દક્ષિણા -
સર્વપ્રીતિકરં દેવ ! હિરણ્યં સર્વસિદ્ધિદમ્ ।
દક્ષિણાર્થં ગૃહાણેદં સઙ્કટં મે વિનાશય ॥ ૩૪॥

(અથવા
સપ્તાસ્યાસન્ પરિધયસ્ત્રિઃ સપ્ત સમિધઃ કૃતાઃ ।
દેવા યદ્યજ્ઞં તન્વાના અબધ્નન્ પુરુષં પશુમ્ ॥

વા
હિરણ્ય ગર્ભ ગર્ભસ્થ હેમબીજ વિભાવસોઃ ।
અનંત પુણ્ય ફલદા અથઃ શાંતિં પ્રયશ્ચ મે ॥)
એકવિંશતિદૂર્વાઙ્કુરુમર્પણ્ ।
તતો દૂર્વાઙ્કુરાન્ ગૃહ્ય વિંશત્યેકં ચભક્તિતઃ ।
એભિર્નામપદૈર્દેવમર્ચયેત્ સુસમાહિતઃ ॥ ૩૫॥

દૂર્વાપણમન્ત્રા -
ગણાધિપાતયે નમઃ । ૧। ઉમાપુત્રાય નમઃ । ૨। અઘનાશનાય નમઃ । ૩।
એકદન્તાય નમઃ । ૪। ઇભવક્ત્રાય નમઃ । ૫। મૂષકવાહનાય નમઃ । ૬।
વિનાયકાય નમઃ । ૭। ઈશપુત્રાય નમઃ । ૮। સર્વસિદ્ધિપ્રદાય નમઃ । ૯।
લમ્બોદરાય નમઃ । ૧૦। વક્રતુણ્ડાય નમઃ । ૧૧। મોદકપ્રિયાય નમઃ । ૧૨।
વિઘ્નવિધ્વંસકર્ત્રે નમઃ । ૧૩। વિશ્વવન્દ્યાય નમઃ । ૧૪।
અમરેશાય નમઃ । ૧૫। ગજકર્ણાય નમઃ । ૧૬।
નાગયજ્ઞોપવીતિને નમઃ । ૧૭। ભાલચન્દ્રાય નમઃ । ૧૮।
પરશુધારિણે નમઃ । ૧૯। વિઘ્નાધિપાય નમઃ । ૨૦। વિદ્યાપ્રદાય નમઃ । ૨૧।
નીરાજનમ્ -
કર્પૂરાનલસંયુક્તં શેષાઘૌઘવિનાશનમ્ ।
નીરાજનં ગૃહાણેશ ! સઙ્કટાન્માં વિમોચય ॥ ૩૬॥

(અથવા
ૐ આ રાત્રિ પાર્થિવઁ રજઃ પિતુરપ્રાયિ ધામભિઃ ।
દિવઃ સદાઁસિ બૃહતી વિ તિષ્ઠસ આ ત્વેષં વર્તતે તમઃ ।)
પુષ્પાઞ્જલિ -
ચમ્પકાશોકબકુલપારિજાતભવૈઃ શુભૈઃ ।
પુષ્પાઞ્જલિં ગૃહાણેમાં સઙ્કટાન્માં વિમોચય ॥ ૩૭॥

(અથવા
યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્તે યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥)
સ્તુતિઃ -
ત્વમેવ વિશ્વં સૃજસીભવક્ત્ર ! ત્વમેવ વિશ્વં પરિપાસિ દેવ ! ।
ત્વમેવ વિશ્વં હરસેઽખિલેશ ! ત્વમેવ વિશ્વાત્મક ! આવિભાસિ ॥ ૩૮॥

નમસ્કારાઃ -
નમામિ દેવં ગણનાથમીશં વિઘ્નેશ્વરં વિઘ્નવિનાશદક્ષમ્ ।
ભક્તાર્તિહં ભક્તિવિમોક્ષદક્ષં, વિદ્યાપ્રદં વેદનિધાનમાદ્યમ્ ॥ ૩૯॥

પ્રદક્ષિણા -
એવં સ્તુવીત વિધિવત પ્રણમેત પુનઃ પુનઃ ।
પ્રદક્ષિણાં પ્રકુર્વીત યથા શક્ત્યૈકવિંશતિમ્ ॥ ૪૦॥

પ્રાર્થના -
યે ત્વામસમ્પૂજ્ય ગણેશ ! નૂનં વાઞ્છન્તિ મૂઢા વિહિતાર્થસિદ્ધિમ્ ।
ત એવ નષ્ટા નિયતં હિ લોકે જ્ઞાતો મયા તે સકલઃ પ્રભાવઃ ॥ ૪૧॥

વાયનં -
આચાર્યસ્ત્વં દ્વિજાધ્યક્ષ ! સર્વસિદ્ધિપ્રદાયક ! ।
વાયનં ગૃહ્યતાં બ્રહ્મન્ ! સઙ્કટાન્માં નિવારય ॥ ૪૨॥

વિશેષાર્ઘ્યં -
ફલપુષ્પાક્ષતૈર્યુક્તં જલં તે દક્ષિણાન્વિતમ્ ।
વિશેષાર્ઘ્યં મયા દત્તં સઙ્કટાન્માં નિવારય ॥ ૪૩॥

॥ ઇતિ ષોડશોપચારાર્ચનમ્ ॥

ગણેશમન્ત્રાર્ચનમ્ -
ૐ નમો હેરમ્બ મદમોદિત મમ સઙ્કટં નિવારય સ્વાહા ।
ઇન્દ્રાદિ લોકપાલાઁશ્ચ સમન્તાત્ પૂજયેત્ સુધીઃ ॥ ૪૪॥

પક્વમુદ્ગતિલૈર્યુક્તાન્ મોદકાન્ ઘૃતપાચિતાન્ ।
ભક્ષ્યાન્યન્યાનિ તામ્બૂલં યથાશક્તિ પ્રકલ્પયેત્ ॥ ૪૫॥

તતો દૂર્વાઙ્કુરાન્ગૃહ્ય વિંશત્યેકં ચભક્તિતઃ ।
એભિર્નામપદૈર્દેવમર્ચયેત્ સુસમાહિતઃ ॥ ૪૬॥

ગણાધિપ ! નમસ્તુભ્યમુમાપુત્રાભયપ્રદ ! ।
એકદન્તેભવક્ત્રેતિ તથા મૂષકવાહન ! ॥ ૪૭॥

વિનાયકેશપુત્રેતિ સર્વસિદ્ધિપ્રદાયક ! ।
લમ્બોદર ! નમસ્તુભ્યં વક્રતુણ્ડાઘનાશન ! ॥ ૪૮॥

વિઘ્નવિધ્વંસકર્તેતિ વિશ્વવન્દ્યામરેશ્વર ! ।

ગજવક્ર ! નમસ્તુભ્યં નાગયજ્ઞોપવીતિને ! ॥ ૪૯॥

ભાલચન્દ્ર ! નમસ્તુભ્યં નમઃ પરશુધારિણે ।
વિઘ્નાધિપ ! નમસ્તુભ્યં સર્વવિદ્યાપ્રદાયક ॥ ૫૦॥

એવં સમ્પૂજયેદ્દેવં દૂર્વાભિશ્ચ પૃથક્ પૃથક્ ।
યદુદ્દિશ્ય કૃતં સમ્યગ્ યથાશક્તિ પ્રપૂજનમ્ ॥ ૫૧॥

તેન તુષ્ટો ભવાશુ ત્વં હૃત્સ્થાન્કામાન્પ્રપૂરય ।
વિઘ્નાન્નાશય મે સર્વાન્ દુષ્ટાંશ્ચ સમુપસ્થિતાન્ ॥ ૫૨॥

ત્વત્પ્રસાદેન સર્વાણિ કાર્યાણીહ કરોમ્યહમ્ ।
શત્રૂણાં બુદ્ધિનાશઞ્ચ મિત્રાણામુદયં કુરુ ॥ ૫૩॥

ઇતિ વિજ્ઞાપ્ય દેવેશં પ્રણિપત્ય પુનઃ પુનઃ ।
તતો હોમં પ્રકુર્વીત શતમષ્ટોત્તરં વ્રતી ॥ ૫૪॥

મોદકૈર્વાયનં કાર્યં વ્રતસમ્પૂર્તિહેતવે ।
લડ્ડૂકૈર્વટકાદ્યૈર્વા ત્રિસપ્તફલસંયુતમ્ ॥ ૫૫॥

રક્તવસ્ત્રેણ સઞ્છાદ્ય સ્વાચાર્યાય નિવેદયેત્ ।
ગણાધિપ ! નમસ્તુભ્યં સર્વસઙ્કલ્પસિદ્ધિદ ! ॥ ૫૬॥

વાયનસ્ય પ્રદાનેન સઙ્કટાન્માં નિવારય ।
તિથ્યર્ઘં -
કથાં શ્રુત્વા તતઃ પુણ્યાં દદ્યાદર્ઘ્યં સમાહિતઃ ॥ ૫૭॥

તિથીનામુત્તમે ! દેવિ ! ગણેશપ્રિયવલ્લભે ! ।
સઙ્કટં હર મે દેવિ ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥ ૫૮॥

દેવાર્ઘ્યં -
લમ્બોદર ! નમસ્તુભ્યં સતતં મોદકપ્રિય ! ।
સઙ્કટં હર મે દેવ ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥ ૫૯॥

ચન્દ્રાર્ઘ્યં -
ચન્દ્રાય સપ્તવારં તુ મન્ત્રેણાનેન પાર્થિવ ! ।
ક્ષારોદાર્ણવસમ્ભૂત ! અત્રિગોત્રસમુદ્ભવ ! ।
ગૃહાણાર્ઘ્યં મયા દત્તં રોહિણ્યા સહિતઃ શશિન્ ॥ ૬૦॥

તતઃ ક્ષમાપયેદ્દેવં તતો વિપ્રાંશ્ચ ભોજયેત્ ।

સ્વયં ભુઞ્જીત તચ્છેષં બ્રાહ્મણભ્યો યદર્પિતમ્ ॥ ૬૧॥

સપ્તગ્રાસાન્ મૌનયુક્તો યથાશક્ત્યા યથાસુખમ્ ।
ઇત્થં કુર્યાત્તુ માસેષુ ચતુર્ષ્વપિ વિધાનતઃ ॥ ૬૨॥

ઇતિ શ્રીગણેશપૂજાવિધિ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૬૯ । ૧.૬૯ ૧૫-૬૨॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 69 . 1.69 15-62..

Note: The pUjA verses are enhanced with verses from different sources.

Proofread by Preeti Bhandare

*Shri Ganeshapujavidhi*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*